শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রীমদ্ভাগৱতে
# ॥ধ্রুৱস্তুতিঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে ৰামানুজায নমঃ

# ॥ ধ্ৰুৱস্তুতিঃ ॥

ধ্ৰুৱ উৱাচ
যোন্তঃ প্ৰৱিশ্য মম ৱাচমিমাং প্ৰসুপ্তাং
সঞ্জীৱযত্যখিলশক্তিধৰঃ স্বধাম্না।
অন্যাংশ্চ হস্তচৰণশ্ৰৱণত্বগাদীন
প্ৰাণান্নমো ভগৱতে পুৰুষায তুভ্যম্॥ ১ ॥

একস্ত্বমেৱ ভগৱন্নিদমাত্মশক্ত্যা
মাযাখ্যযোৰুগুণযা মহদাদ্যশেষম্।
সৃষ্টৱানুৱিশ্য পুৰুষস্তদসদগুণেষু
নানেৱ দাৰুষু ৱিভাৱসুৱদ্বিভাসি॥ ২ ॥

ত্বদ্দত্তযা ৱযুনযেদমচষ্ট ৱিশ্বং
সুপ্তপ্ৰবুদ্ধ ইৱ নাথ ভৱতপ্ৰপন্নঃ।
তস্যাপৱৰ্গ্যশৰণং তৱ পাদমূলং
ৱিস্মৰ্যতে কৃতৱিদা কথমাৰ্তবন্ধো॥ ৩ ॥

নূনং ৱিমুষ্টমতযস্তৱ মাযযা তে
যে ত্বাং ভৱাপ্যযৱিমোক্ষণমন্যহেতোঃ।
অৰ্চন্তি কল্পকতৰুং কুণপোপভোগ্যম
ইচ্ছন্তি যতস্পৰ্শজং নিৰযেপি নৃঋণাম্॥ ৪ ॥

যা নিৰ্বৃতিস্তনুভৃতাং তৱ পাদপদ্ম-
ধ্যানাদ্ভৱজ্জনকথাশ্ৰৱণেন ৱা স্যাত্।
সা ব্ৰহ্মণি স্বমহিমন্যপি নাথ মা ভূত
কিং ত্বন্তকাসিলুলিতাত্ পততাং ৱিমানাত্॥ ৫ ॥

ভক্তিং মুহুঃ প্ৰৱহতাং ত্বযি মে প্ৰসঙ্গো
ভূযাদনন্ত মহতামমলাশযানাম্।
যেনাঞ্জসোল্বণমুৰুৱ্যসনং ভৱাব্ধিং
নেষ্যে ভৱদগুণকথামৃতপানমত্তঃ॥ ৬ ॥

তে ন স্মরন্ত্যতিতরাং প্রিযমীশ মর্ত্যং
    যে চান্বদঃ সুতসুহৃদগৃহৱিত্তদারাঃ।
যে ত্বব্জনাভ ভৱদীযপদারৱিন্দ-
    সৌগন্ধ্যলুব্ধহৃদযেষু কৃতপ্রসঙ্গাঃ॥ ৭ ॥

তির্যঙনগদ্বিজসরীসৃপদেৱদৈত্য-
    মর্ত্যাদিভিঃ পরিচিতং সদসদ্বিশেষম্।
রূপং স্থৱিষ্ঠমজ তে মহদাদ্যনেকং
    নাতঃ পরং পরম ৱেদ্মি ন যত্র ৱাদঃ॥ ৮ ॥

কল্পান্ত এতদখিলং জঠরেণ গৃহ্নন
    শেতে পুমান্ স্বদৃগনন্তসখস্তদঙ্কে।
যন্নাভিসিন্ধুরুহকাঞ্চনলোকপদ্ম-
    গর্ভে দ্যুমান্ ভগৱতে প্রণতোস্মি তস্মৈ॥ ৯ ॥

ত্বং নিত্যমুক্তপরিশুদ্ধৱিবুদ্ধ আত্মা
    কূটস্থ আদিপুরুষো ভগৱাংস্ত্র্যধীশঃ।
যদবুদ্ধ্যৱস্থিতিমখণ্ডিতযা স্বদৃষ্ট্যা
    দ্রষ্টা স্থিতাৱধিমখো ৱ্যতিরিক্ত আসসে॥ ১০ ॥

যস্মিন্ ৱিরুদ্ধগতযো হ্যনিশং পতন্তি
    ৱিদ্যাদযো ৱিৱিধশক্তয আনুপূর্ৱ্যাত্।
তদব্রহ্ম ৱিশ্বভৱমেকমনন্তমাদ্যম
    আনন্দমাত্রমৱিকারমহং প্রপদ্যে॥ ১১ ॥

সত্যাশিষো হি ভগৱংস্তৱ পাদপদ্মম
    আশীস্তথানুভজতঃ পুরুষার্থমূর্তেঃ।
অপ্যেৱমর্য ভগৱান্ পরিপাতি দীনান
    ৱাশ্রেৱ ৱতসকমনুগ্রহকাতরোস্মান্॥ ১২ ॥

॥ ইতি ধ্রুৱস্তুতিঃ সংপূর্ণা ॥